International Journal of Sanskrit Research 2021; 7(5): 255-257

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 255-257
© 2021 IJSR
www.anantaajournal.com
Received: 16-07-2021
Accepted: 05-08-2021

**शङ्कर वेरा**
शोधच्छात्रः, शिक्षाविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

Corresponding Author:
**शङ्कर वेरा**
शोधच्छात्रः, शिक्षाविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

# स्फूर्तकक्षाधिगमे (Smart Class) अभिप्रेरकतत्त्वानि

**शङ्कर वेरा**

**सारांशः**
वैज्ञानिकयुगेऽस्मिन् मानवाः यन्त्राधारिताः भवन्ति। छात्रकेन्द्रितशिक्षाव्यवस्थायां पठनपाठनसमये सामान्यकक्षायामुपवेशने छात्राणामरुचिर्दृश्यते। अतः कक्ष्यां रुचिपूर्णं कारयितुमुपायः परिकल्पते। तथा च अभिप्रेरणमपि दातव्यं भवति। उपायत्वेन यदि स्फूर्तकक्षामाध्यमेन अध्ययनं भवति तर्हि पाठः रुचिपूर्णो भवति, सारल्येन छात्राणामधिगमश्च भवति। एतदर्थमभिप्रेरणा अपेक्ष्यते। पुनश्च वर्तमानपरिस्थितौ सर्वत्र ई-माध्यमेन शिक्षाप्रदानं प्रचलति। कदा स्वाभाविकरूपेण पूर्ववत् एकत्र मिलित्वा पठनपाठनकार्यं भविष्यतीति वक्तुं न शक्यते। अस्यां परिस्थितौ सम्यग्रूपेण कक्षां चालयितुं सर्वेषां कृते अभिप्रेरणा सुतरां स्यात्। अतः स्फूर्तकक्षाविषये सम्यक् परिचयज्ञानं भवेत्। कक्ष्यायां भागग्रहणे रुचिवर्धनाय च कथमभिप्रेरणां दातुं शक्यते, इत्यस्मिन् विषये प्रतिपादयिष्यते।

**प्रधानसंसूचकानि** – स्फूर्तकक्षा, स्फूर्तकक्षायाः उपकरणानि, अभिप्रेरणा, अभिप्रेरकतत्त्वानि।

## भूमिका
साम्प्रतिकसमाजे शिक्षाव्यवस्था छात्रकेन्द्रिता भवति। प्रचाल्यमानायां निरसकक्ष्यायां छात्राणामरूचिः नूनं प्रतीयते। यतोहि पठिष्यमाणः पाठः रुचिपूर्णः कदाचिन्न स्यात्। समसामयिकसमाजे संस्कृताध्यापकाः यन्त्राधारितशिक्षायाम् प्रभाव्यध्यापने दक्षाः नैवोपलभ्यन्ते। अपरपक्षे इदानीं कोरोनाविषाणुकारणेन सर्वत्र विद्यालयः स्थगितो वर्तते। अध्यापकाः छात्राश्च एकत्र उपविश्य पठनपाठनं न क्रियमाणाः सन्ति। पुनः कदा स्वाभाविकरूपेण पूर्ववत् एकत्र उपविश्य पठनपाठनकार्यं भविष्यतीति सन्देहो जायते। तर्हि अस्यां परिस्थितौ शिक्षाव्यवस्थायां स्फूर्तकक्षामाश्रित्य पठनपाठनकार्यं रुचिपूर्णरूपेण भवितुमर्हतीति चिन्त्यते। साम्प्रतिककाले रुचिपूर्णतया अध्यापनस्य महती आवश्यकता भवति। तदर्थं विविधप्रकाराः शिक्षणमाध्यमाः स्वीकर्तव्याः सन्ति येषां माध्यमेन शिक्षणे छात्राः रुचिं प्राप्नुयुः तथा शीघ्रतया च तेषां सुष्ठुविषयाधिगमःजायेत। छात्राणां पठनविषयकं विशिष्टाभिरुचिरुत्पादनाय शिक्षणमाध्यमत्वेन ध्यातव्यविन्दुः भवति अभिप्रेरणा। यावत्पर्यन्तं छात्राणाम् अध्ययने मनः न भवति तावत्पर्यन्तं पठनाभ्यासं ते कदापि कर्तुं न प्रभवन्ति इति कारणेन पठने रुचेरुत्पादनाय विविधाः अभिप्रेरणोपायाः शिक्षणे प्रकर्तव्याः एव। तदा छात्राणाम् अधिगमः सारल्येन भवति। अतः सर्वेषां भागग्रहणं कारयितुम् अभिप्रेरणायाः अपेक्षा वर्तते।

अतः स्फूर्तकक्षाधिगमे अभिप्रेरकतत्त्वानि कानि कानि भवन्ति पत्रेऽस्मिन् वर्तते।

**स्फूर्त-कक्षा**

विविधः आधुनिकयन्त्राशः तन्त्रांशः तथा प्रौद्योगिकीसहायेन कक्ष्याशिक्षणं भवति स्फूर्त-कक्षा। अधिगमस्य प्रविधीनां एकत्रितरूपेण शिक्षणस्य तथा अधिगमस्य अवसरः भवति स्फूर्तकक्षा। एषा एका नवीना व्यूहरचना। यत्र सङ्गणकः, विशेषतन्त्रांशः, शिक्षणसहायकोपकरणम्, अन्तर्जालः, श्रव्योपकरणम्, दृश्योपकरणम्, स्फूर्तदूरवाणी प्रभृतयः भवन्ति।

**स्फूर्तकक्षाधिगमः**

यत्र छात्राणाम् अधिगमः स्फूर्तकक्षामाध्यमेन भवति सः स्फूर्तकक्षाधिगमः। वस्तुतः सामान्यकक्षायां छात्राः पठन्ति, परन्तु तत्र तेषां रुचिः न्यूना भवति। अनन्तरम् अधिगमे क्लिष्टता भवति। अतः अधिगमे सरलोपायान्तरं प्रत्यक्षदर्शनयुक्ताधिगमेव स्फूर्तकक्षाधिगमः।

**स्फूर्तकक्ष्यायाः प्रयोजनानि**

एषा नूतनव्यवस्था शिक्षाजगति विप्लवसदृशमेव। शिक्षक-छात्रयोः कार्यम् अन्तर्जालमाध्यमेन प्रत्यक्षरूपेण अधिगमे स्फूर्तिप्रदानं तथा रुचिहीनछात्राणाम् अधिगमे आकर्षणं मुख्यतया तन्त्रांशसहायेन छात्राणां मूल्याकनं च। अस्याः स्फूर्तकक्ष्यायाः प्रमुखानि प्रयोजनानि -

- कक्ष्यां रुचिपूर्णां अभिनवप्रयोगसंवृता भवति।
- सरलरूपेण अधिगमः जायते।
- शिक्षकाणां नूतनप्रतिस्पर्धायाः सम्मुखीकरणम्।
- शिक्षार्थिनां दक्षताविकासे सहयोगः ।

**स्फूर्तकक्षायाः वर्गीकरणम्**

स्फूर्तकक्षा प्रकारद्वयं भवति।

एकत्र प्रकोष्ठे उपविश्य यन्त्रांश-तन्त्रांशमाध्यमेन छात्रः, अध्यापकश्च परस्परं समन्वयं कुरुतः।

आधुनिकयन्त्र-तन्त्राणि उपयुज्य विविधस्थानेषु उपविश्य छात्राध्यापकयोः परस्परं शिक्षणाधिगमस्य प्रकल्पनम्।

**स्फूर्तकक्षायाः उपकरणानि**

दूरदर्शनम्(Television),
उर्ध्वशीर्ष-प्रक्षेपकः(Projector),
सङ्गणकः (Computer),
अन्तर्जालः(Internet),
स्फूर्त-दूरवाणी(Smart Phone),
श्रव्योपकरणम्(Audio Aid),
दृश्योपकरणम्(Visual Aid),
सामाजिकप्रचारमाध्यमाः (Social Media) यथा-
ई-मेल्(E-mail),
आमुखपटलम्(Facebook),
ट्विटर्(Twitter),
व्हट्सएप(WhatsApp),
यूट्यूब(YouTube) प्रभृतयः।

**अभिप्रेरणा**

प्रत्येकं कार्यस्य कारणमभिप्रेरणं वर्तते। अभिप्रेरणा एका एतादृशी प्रक्रिया वर्तते, यस्यां मनुष्यस्य आन्तरिकशक्तयः वातावरणे विद्यमानविभिन्नलक्ष्यानां वस्तूनां प्रति निर्देशिताः भवन्ति। प्रत्येकं व्यवहारस्य तथा कार्यस्याधारः प्रेरकवृत्तिः भवति।

**प्रधानविषयः**

- अभिप्रेरकतत्त्वानि

वर्तमानपरिस्थितौ सर्वत्र सद्यस्क(Online)माध्यमेन कक्षा प्रचलति। परन्तु तत्र छात्राणां शिक्षकाणां च भागग्रहणं प्रत्यक्षकक्षासदृशं सम्पूर्णरुपेण न भवति। अस्यां परिस्थितौ स्फूर्तकक्षायाः द्वितीयभागः एव मुख्यभूमिकां पालयति। अतः शिक्षाव्यवस्था सम्यग्रूपेण परिचालयितुम् अभिप्रेरकतत्त्वानि –

- दृश्यश्रव्योपयोगोपायाः
- श्रव्योपकरणोपयोगोपायाः
- दृश्योपकरणोपयोगोपायाः
- सामाजिकोपायाः
- श्रवण-भाषण-पठन-लेखनाधारितोपायाः
- स्पर्धात्मकोपायाः
- क्रीडात्मकोपायाः (संस्कृतक्रीडोत्सवाः)
- संगणकात्मकोपायाः
- उपागमात्मकोपायाः
- विध्युपायाः
- भाषाप्रयोगशाला

**दृश्यश्रव्योपयोगोपायाः**

शिक्षणे दृश्योपायानाम् उपयोगेन छात्रेषु संस्कृताध्ययनरुचिः उत्पादयितुं शक्यते। यत्चित्रमाध्यमेन नाटकमाध्यमेन क्रियाकलापादिभिश्च अध्ययनं विधीयते तर्हि ते रुचिपूर्वकं विषयम्

अवगन्तुम् अभिप्रेरिताः भवन्ति, शनैः शनैः विषयस्य अवगमनं कर्तुं शक्नुवन्ति। यथा प्रार्थनासभायामपि दृश्यरुपेण बहुविधकार्यक्रमाः कर्तुं शक्यन्ते।

यथा – वार्ताश्रावणम्, महापुरुषस्योक्तिः, अर्थसहितसुभाषितम् इत्यादिनां चलचित्रमाध्यमेन उपस्थापनम्।

अत्र हि छात्राणां पुरस्तात् विविधप्रकारकोपायानां चिन्तनेन रुचिः उत्पादयितुं शक्यते। तदर्थंलघु – लघुचित्राणां विषयाणां च माध्यमेन एकं चित्रं निर्माणं तदनु तेषां पाठनं, तेन छात्राणां साहाय्येन नूतनतयाविषयाणां व्यवस्थितीकरणं भवति। अभिनयपूर्वकनाटकानि अपि रुच्युत्पादनाय कश्चन महत्त्वपूर्णः उपायः भवितुम् अर्हति।

**दृश्योपकरणोपयोगोपायाः**

पाठ्यविषयाधारिकृत्य विविधप्रकारकाः उत्तमचित्राणां प्रदर्शनम्। पाठ्यविषयाणां विन्दुरुपेण उपस्थापनम्। यदा छात्राणां नेत्रपटले प्रत्यक्षविषयः प्रतिभाति, स च विषयः मनसि अधिकं तिष्ठति।

**श्रव्योपकरणोपयोगोपायाः**

कक्षायाः प्रारम्भे गीतं श्रावणीयम्। कदाचित् श्लोकाः कथाः इत्यादयः श्रावणीयाः।

सामाजिकतत्त्वानि शिक्षणाय केचन सामाजिकाः उपायाः अपि भवितुम् अर्हन्ति येषां माध्यमेन सरलतया संस्कृतशिक्षणं कर्तुं शक्नुमः। तत्र समाजिकस्थलेषु विविधविषयाणां माध्यमेन संस्कृतशिक्षणस्य विशिष्टं किमपि रूपं साधनीयं, यद्द्वारा छात्रेषु कश्चन विशिष्टावसरः कल्पयितुं शक्यते। अत्र ये उत्तमतया पठन्ति रुचिमन्त च भवन्ति तेभ्यः पुरस्काराः प्रदेयाः सन्ति। समाजे प्रतिष्ठादानमपि भवितुम् अर्हति।

अन्तर्जालव्यवहारतत्त्वानि सर्वे मानवाः इदानीम् अन्तर्जालस्य उपयोगं कुर्वन्ति। परन्तु तत्र शिक्षाविषयककार्यक्रमे भागग्रहणं न कुर्वन्ति। अतः तेषां पुरतः संगोष्ठीमाध्यमेन अन्तर्जाले शिक्षणावसरं प्रकल्प्य सूचनीयम्।

सामाजिकप्रचारमाध्यमाः यथा फेसवुक, यूट्यूव, प्रभृतिनां माध्यमेन शिक्षा प्रसारणम्।

शिक्षकस्य दायित्वं पाठ्यविषयः चलचित्रम्, क्रीडावत् रचयित्वा पाठनीयम्।

**निष्कर्षः**

उपयुक्तविवेचनेन स्पष्टं यत् सर्वासु निधासु विभिन्नविधयः सन्ति येषां माध्यमेन छात्राणां पुरस्तात् सुतरां योग्यरीत्या बोधनं कर्तुं शक्यते छात्राः च तदर्थं रुचिमन्तः भूत्वा शीघ्रमेव विषयम् अवगन्तुं शक्नुवन्ति। शिक्षणे इन्द्रियाणां सक्रियत्वं जायेत तदर्थं रुच्युत्पादकतां साधयन्ति। यदि रुच्याविषयस्याध्ययनं न क्रियते तर्हि छात्राः ज्ञानवन्तः न भवन्ति तेषु सक्रियता च न आयाति इति। विषयस्य सर्वथा दुर्बोधत्वं भवति तदर्थं सर्वत्र अभिप्रेरणाप्रदानम् अनिवार्यमेव प्रतीयते। सर्वाणि इन्द्रियाणि यदा सक्रियाणि जायन्ते तदा छात्राः शीघ्रमेव विषयाधिगमं कर्तुं शक्नुवन्ति तेषां विषयज्ञानेन सर्वविधविषयस्य अधिगमः भवितुम् अर्हति।

अतः निष्कर्षरूपेण कथयितुं शक्यते यत् छात्राणां बोधनाय सुतराम् आवश्यकता वर्तते अभिप्रेरणा। तदर्थम् इमे उपायाः छात्राणां रुचिं वर्धयितुं शक्ष्यन्ति इति शम्।

**सन्दर्भग्रन्थसूची**


1. पात्रः डा. वृन्दावन, शिक्षणस्य वैज्ञानिकाधारः, अनन्ताक्षरप्रकाशनम् पुरी, 2008
2. जमदग्निः श्रीकान्त, संस्कृतसङ्गणकशब्दकोशः, संस्कृत परिषद्, हैदराबादः, 2009
3. पात्रः डा. वृन्दावन, कक्षासम्प्रेषणम्, तीरतरङ्गप्रकाशनम्, भुवनेश्वरः, 2010
4. नारङ्ग एस्, के, कम्पुटर शिक्षण, अग्रवाल प्रकाशन, आगरा।
5. नन्द डा. सागरिका, सङ्गणकशिक्षा शैक्षिकोपयोगश्च, आई. वाई. डि. पी. प्रकाशकः, भुवनेश्वरः 2014
6. https://www.google.com/amp/s/www.eins.ai/whats-a-smart-classroom-and-why-do-you-need-it/amp/
7. http://www.vkmaheshwari.com/WP/?p=2352
8. https://www.researchgate.net/publication/315430166_Smart_classroom_system_based_on_android_platform
9. https://www.academia.edu/38159740/SMART_Classroom_Teaching_Solutions_pdf?email_work_card=interaction-paper